त्किमपिकार्यंप्रतिवेशनइत्यर्थः॥एकार्थेति॥नगेशब्दवदनेकार्थानां॥उदयेति॥उदयःसम्पद्भिरपि॥द्र
ग्जायनार्गस्तल्लक्षःप्रजावागोक्तिन्यंकलंकोपि॥निद्रालस्यमपिक्रियाधर्माद्याअपिस्वैराअन्यायेनापिने
ज्ञःप्रतापोपि॥विभाकरोनामराजा॥वक्ष्यमाणार्थसूचापिप्रायेणोक्तोनरूपःदयोरर्थयोःप्रकृतत्वेनवक्तु
मनिष्टत्वात्॥किंतुवस्तुध्वनिरेव॥यथा॥यातिन्यायप्रवृत्तस्येति॥अत्रप्रकृतत्वेनार्थोन्यायनिरूपवृत्तिः सू
च्याप्रायेणतुरामादिवृत्तिः॥भेदकैरित्यपमेयस्यविशेषणैःपरस्योपमानस्योक्तिःपरोक्तिःविशेष्य
स्यैत्यपमेयस्यतस्याश्लिष्टत्वेश्लेषप्राप्तेः॥लक्ष्मीति॥लक्ष्यातवबाहुस्पर्शेयस्याःसकोप्युल्लासःजयल
क्ष्मीस्तवविरहेणभवतुदुर्बलानुसा॥तवविरहेणहेतुनादुर्बलाभूयात्॥णेनन्वर्थो॥अत्रविशेषणा
निकोतयासहतुल्यानिनतुविशेष्येजयलक्ष्मीरितिरूपेअस्योविशेषणसाम्यादप्रस्तुतस्यप्रस्तुतविशे
षकत्वेनप्रतीतिः॥अतोविशेषकत्वाद्व्यवहारसमारोपःरूपसमारोपेतुरूपकंस्यात्॥एषमेयस्यानुक्तो
सामानवस्तुन्यासःसमासोक्तिरितितुचामनः तन्मते प्रस्तुतप्रशंसान्यथाज्ञेया॥कस्त्वेति॥अस्मन्या
र्कवंशवर्णनमसंभावद्दृष्टांतिकदृष्टांतवस्तुनोरोपम्यंकल्पयति निरपेक्षवाक्यार्थयोर्बिंबप्रतिबिंबत्वं
दृष्टांतस्यलक्षणात्रप्रकृतवाक्यार्थैकवाक्यार्थांतरारोपात् सापेक्षत्वेसंबंधानुपपत्तिमूलंनिदर्शनान
दृष्टांतः॥एषावाक्यार्थेननिदर्शनापदार्थेनसायथा॥उदयतीति॥तत्सदृशमिति॥गजलीलानुस्मो दोर्भ्यां
मितिरंगवतीनर्तनद्वंद्वंगोक्तिः स्वस्येति॥स्वश्चपतनात्क्रियायाः स्वभावः स्वहेतुश्च तस्याश्चकारणमुच्च

नपदार्थस्वरूपतयोरन्वयः कार्यकारणत्वेन घटना॥एवमिति॥अत्रममेवान्यस्यापिरूपकोरुज्वेःपदा
र्थिः पानीतेतिकारणकार्ययोरन्वयेनोपमानोपमेयत्वा॥क्षेपेसोभावहस्तुसंबंधानिर्देशनारूपसिद्धये
वाच्येनोपमानोपमेयभावरूपार्थान्तरमाक्षिप्यतइति॥अपरेति॥उच्चैरुक्तापातक्रिययेतिदंडिरूपयापतन
स्येतिपतेदित्येवमुद्विग्नितस्योच्चैःपदार्थिरूपकारणकार्यस्वरूपस्य॥कारणस्येति॥उच्चैःपदार्थिरूपस्यअ
प्रस्तुतेति इहाप्रस्तुतस्यस्तुतिर्निंदारामर्ष्येवर्णनादेषाप्रशंसा॥अत्रवर्णनास्तुतिः तच्चाप्रस्तुतमप्रस्तु
तत्वादेववक्तुमयुक्तंसप्रस्तुतपरतयोच्यमानंयुक्तंस्यात्प्रस्तुतपरतायांकार्यकारणभावसामान्यचि
शेषभावूसारूप्यसंबंधेस्यातू॥सैवेति॥याप्रशंसाकविभिरप्रस्तुतस्यक्रियतेसाप्रस्तुतपरासैवाप्रस्तु
तप्रशंसेव॥तदन्यस्यति॥कार्यप्रस्तुततदन्यस्यकारणस्येत्यादिक्रमेणचतुष्टयस्यतथानुक्त्यराज्ञादौ
प्रस्तुततदन्यस्यकारणस्येत्यादिक्रमेणचतुष्टयस्यतथानुक्त्यराज्ञादौप्रस्तुततदन्यस्यतुक्त्यस्य॥तद
क्षोभणमितिपेचधात्वंअत्रवाच्यस्यपरार्थस्यसमर्पणमितिलक्षणेनलक्षणानिरामिति॥अग्रे
पित्वेलक्षाचिंतयाभ्रंशेवसियनः हसितेनेति॥तथायथाहसितंयथात्वयात्मकारसंनामरिष्यामि
इतिकारणंसूचितं॥कुमारेति॥कुमारचंरेराजशुकोवरशुकः॥त्वयात्रोद्यतंशाल्वादिपरंतनष्टइतिप्र
स्तुतोहेतुरूपोर्थः॥शुकचरितंतत्स्वप्रस्तुतः कार्यरूपः प्रस्तुतार्थस्यात्मानमर्पयतीत्यर्थः॥यदाकारणवर्त्मा
रूढचरितरूपकार्यस्यापिवर्ण्यत्वेनप्रस्तुतत्वेकार्यद्वारातमभिप्रेयतेनकारणस्योक्तावत्रपर्यायोक्तास्यैवा
रः कारणापेक्षयाकार्यस्यातिचारुत्वमितिकार्यमेवोच्यते॥कारणकार्ययोःप्रस्तुताप्रस्तुतत्वेःप्रस्तु

DR. BHAU DAJI MEMORIAL डॉक्टर भाऊदाजी स्मारक संग्रहालय



नप्रशंसा॥मुरुवात्इति॥मुरुवमाकृतिंलोकान॥एतस्याआकृतेरिदमित्थमित्यर्थः॥मुरुवादित्यपेक्षित
क्रियमयादानं॥अत्रोभोविंदोमणिर्धाविशेषःकथ्यामिति॥कृष्णेननरकारेहतेनन्मित्रेणास्मित्रप्र
स्कन्दिःपुरुषादिति॥पुंस्त्वंविक्रमपौरुषंवाअथःपातान्नीचतयाचस्खलनंच॥प्रणयनेयज्ञानमहानपिवामनः
स्वल्पश्चपुरुषोत्तमःसन्नरोपिअत्रसाधुवृत्तंवाच्यत्वात्प्रस्तुतंतत्रचाभिधायानियंत्रणान्नात्रदोषः॥
विष्णुप्रपत्तिस्तुशब्दात्स्थाध्वनेरेवेतिनेहाप्रस्तुतप्रशंसेतिचेन्नसाधुवृत्तस्यवाच्यत्वासंभवात्तस्यकृष्टेपि
पुमान्विष्णुवद्स्तुतयाविश्वमुद्वर्तुमीष्टेआक्षिप्यमाणस्यस्तुतस्यगुणवत्त्वानदूषणंमविरुद्धं॥गुणाहृत
त्वात्तस्मात्तत्रविष्णुवृत्तंवाच्यमप्रस्तुतंच तेनचप्रस्तुतंसाधुवृत्तमाक्षिप्यतइतिनध्वनिःसंध्यप्रस्तुता
क्षेपरूपःस्याद्येनासौति॥ज्ञडधामनाशीतनेजस्तामुरुवाश्रयनाच॥अत्रपूर्वस्मिंकेपुरोक्तनवदिशेष्यम
र्कदुरुधेनाश्लिष्टं॥विशेषणाश्लिष्टत्वेनुसमासोक्तिस्तुन्यांतराक्षेपहेतुःपूर्वत्रतुरूपेपादयोरपिश्लिष्टत्वात्॥
इयंचेति॥सादृश्यहेतुकाप्रस्तुतप्रशंसाअब्धेरिति॥आहोरितियद्यर्थेकस्मःशक्तः॥अत्राक्षावर्पादृशस्यार्थ
स्यसंभवान्नैकांतेनकस्यापीश्वरस्याक्षयाकांक्षा॥गर्वपुंस्त्वादित्यत्रादायेत्यत्रचगत्यार्थानध्यारोपःयेनासौ
त्यतुचंद्रसंबोधनारेरर्थस्यासंभवादपकारिण्यार्थेछोदरिद्रस्याध्यारोपः॥कस्त्वमिति अत्रकथया
मीत्येतदाह श्रूयमाणंनिर्वेदकृदपिनवानुबंधात्कथ्यते॥कस्मादितिचेदाराध्यहेतुप्रश्नःकथ्यतइत्या
दिनानिर्वेदस्मरणोपक्रमंकथंकथमपिनिरूप्यते॥वामेनेतिकुकुलादिनोपलक्षितःवरइतिफलदानशू
न्यछायामात्रकरणादेवगर्भिणःछायापीति॥स्मशानाग्निदग्धपल्लवादिस्तुविशेषोहिशरवोदकःमार्गः

सतांपथा अपि॥अत्रदक्षेणसद्भावेननत्वादुक्तिप्रत्युक्तयोरावेशोमत्पुरुषसेवयारेवदवाचदरिद्र
मनस्वीकश्चित्पुरुषःप्रतीयमाननयाध्यारोप्यते॥सोपूर्वइतिरसनाविपर्ययेणजानांशापज्ञोस्मीक
वचोपि॥चापरुंरवरुवचःश्रवणासोगुरुण्यनापिअन्यकरत्वमदात्वनापि॥नहेतुरितितेनवार्थेप्रतीय
मानस्यकस्यापिकुरचामिसेचकस्यारोपःकार्यचापरुमसेचनेमदश्वसेबनेहेतुःप्रस्तुताप्रस्तुतयो
र्वाच्यत्वेविशेषस्यापिश्लिष्टत्वंधर्मेषःविशेषणानांश्लिष्टत्वेःप्रस्तुतस्यवाच्यत्वेःन्यस्यनुगम्यत्वेसमासोक्तिः
अप्रस्तुतस्यवाच्यत्वंप्रस्तुतस्यगम्यत्वेप्रस्तुतप्रशंसेतिविवेकः॥कमलमितिअत्राभेदातिशयोक्तिरित्ये
कोभेदःगुखादेःकमलादिरूपतयाध्यवसानेप्रथमोभेदःकमलननामसीत्यादियोगेत्वसंबंधेसंबंध
रूपातिशयोक्तिःनथाविरोधाल्लंकारोपि॥तदेवेति॥प्रस्तुतभिन्नमन्यत्वेनभेदेनाध्यवसीयते॥अत्रभि
न्नि अनरुटभत्वंगन्याकापिवर्तनछायाश्यामासमान्यप्रजापतेरेवेवनभवति रेखामर्यादावर्त्तणंव
क्रेवर्तनाचाअत्रान्यरुटभत्वमित्यभेदेपन्यत्वेनभेदोक्तिरितिद्वितीयः॥अत्राभेदोभेदइतिवाक्योपप
त्तयेवालचरुटभत्वस्यसातिशयंकविकल्पितंरुटभत्वंकल्पनीयं॥उत्तरार्धेसंबंधेष्यसंबंधरूपातिशा
योक्तिःशकेति॥शकेदीर्घिरुटभत्वस्यबहिरसंभवेपिकविनासंभवद्रूपतयोक्तावास्यंनिरूपमित्यर्थः
॥पोन्याद्योपमेतिरुद्रटःअद्भुतोपमेतिदंडिमुख्याः॥अयंसंबंधेष्यसंबंधरूपस्तृतीयःक्वचिदसंबंधे
संबंधोयथा॥पुष्पप्रवालोपहितमिति॥अत्रासंबंधसंभावनयासंबंधःहृदयमिति॥अत्रकुसुमशरा
धिष्ठानंतुकारणतयोर्विपर्यासःकृतः॥प्राक्कार्यंपश्चात्कारणमिति विपर्ययस्तुल्यकारणत्वेनापिस्या



त्यदायथोचित्यमोचितीतथापोर्वापर्ययोर्वापरीतस्याआइषदिपर्ययस्तुल्यकालत्वंतत्रातिशयो
क्तिर्यथा॥अविरलविलोलजरुदःकुटजार्जुनोपकरणिवनवातः॥अयनायातःकालोहंतहताः॥
पथिकगेहिन्यः॥प्रतीतिवस्तुशब्दस्यवाक्यार्थवाचित्वेप्रतिवाक्यार्थमुपमासान्यमित्यन्वर्थाश्रयणात्
केवलंकाव्यसमयात्पर्यायांतरेणपृथग्निर्देशः॥अयंभावःसामान्यधर्मस्यैवाद्यनुक्तोसकृन्निर्दे
शेदीपकतुल्ययोगिते॥असकृन्निर्देशेहसामान्यरूपत्वंप्रतिवस्तूपमा॥सामान्यधर्मस्यबिंबप्रतिबिंब
भावेनदृष्टांतःदेवीति॥अत्रपरिवारपरत्वंसाधारणोधर्मःपरिभोगयोग्यमितिपर्यायेणभिन्नउक्तः॥
परिवारपदत्वपरिभोगयोग्यत्वयोरेकार्थत्वात्॥प्रकृतिरेवेति॥इदमेकंप्रकृतंनशेषंयत्रमुपमानभूतं
॥गवमितिं॥यथाहरवन्नविषमदृष्टिरित्यादौव्यतिरेकेव्यतिरेकमालाअरत्नैकस्यचदुष्प्रापेभेदेनोक्तिः
अस्यामिवाद्यभावेपिप्राकर्णितत्वात्लोचनयोपम्यावगतिःदृष्टांतइति॥अत्रपुनःशब्दःपूर्वस्मादिशेषकः॥
विशेषश्चबिंबप्रतिबिंबभावगवा॥सर्वेषामिति॥ननुप्रतिवस्तूपमायामिवसाधारणधर्मस्यैवहिःप्रयो
गःकिंतूपमेयादेरपिनिश्चयोयत्रेतिभणनात्॥यत्रविशेषणविशेषोबिंबप्रतिबिंबभावेसतिसमर्थ्य
तसदृष्टांतः॥निश्चयस्यविशेषादेवसंभवान्नविशेषरूपतयैवदृष्टांतेबिंबप्रतिबिंबभावयोगान
विशेषस्यसामान्येनसमर्थनेत्वर्थांतरन्यासःस्यादिति॥यथाकुमुदिन्याश्चंद्रालोकेनदूषणपक्षपा
तित्वंनकुमुदंचिकसतीति॥तथात्वदृशंगुणपक्षपात्तान्नस्यामनइतिसर्वप्रतिबिंबनं॥सवेति॥अत्रवि
शेषोरुतागमनादीनांस्थिरत्वाधानादिवैधर्म्येणप्रतिबिंबनं॥दृष्टांतेसाधारणधर्मोणोयत्नवत्त्वाद्य

भेदरागच॥परेशङ्कान्तरेणोक्तत्वात्प्रतिबिंबनेभेदाभासइतिप्रतिबिंबनेनियतनिष्ठत्वांतेषांसाधारणतानास्तीतिनाङ्गत्वं॥राकरुछब्देवेति॥अयंभावःराकचस्थितिःक्रियादिःसमानोधर्मःप्रसंगेनान्यत्रोपचारादीपनाख्याद्दीपकं॥अत्रप्रकृताप्रकृतत्वयोर्वास्तवत्वादर्थानौपम्यं॥सत्येपरंगम्येनथौतमनोनोपमानुस्मयोगियोतोकास्मनिकोपम्य॥ऊहद्वानामेवप्रकृतानामप्रकृतानांवातत्त्वग्रहणान्न पुनर्युगपदुभयग्रहणमिति॥किंविशेषेति॥कुरुवाल्लाःप्रकृताःशोभनप्रकृतेअत्रक्लिष्यंतीतिक्रियासमानधर्मसचोक्तनिर्दिष्टः इत्येतक्रियादीपकं॥आधिमध्यक्रियादीपकस्वेनोह्य॥रिवधूनीति॥अत्रचधूरूपेकारकमेतस्मिंबहुषुक्रियासुकर्तृनिइत्येतत्कारकदीपकं आदिमध्यकारकदीपकेज्ञेयेतथाक्रियायाःसर्वत्रवाक्येप्रयोगात्तद्दीपकत्वेसर्ववाक्यसाकांक्षत्वंस्यादतोनक्रियामात्रंदीपकंकिंतुभूयोभिःसजातीयैःकारकैःसंबध्यमानंतस्यचानेकेनार्थेपुसाधारणतयासंबध्यमानस्यबलादीपन्यगर्भत्वं॥संख्यानेति॥अत्रासादनक्रियानिमित्तंदीपनंदीपनविषयाणामुत्तरोत्तराधिक्यत्वेनकृतं॥तथाकांदंडाद्यैःशरादीनांक्रमेणोत्कर्षोविवक्षितः॥राकाबर्लीतुपूर्वस्योत्तरोत्तरेणोत्कर्षहेतुत्वेस्यादितिविवेकः॥पांडुरामितिअत्रसर्वाणिप्रकृतानिक्षेत्रियरोगोराजयक्ष्मान्यस्मिन्क्षेत्रेदृश्यतेरुचिकित्स्यःपक्षेनुपपत्तिविषयोअनुरागःआवेदयंतीतिसकृद्धर्मः॥कुमुदेति॥अत्रकुमुदादीनिसर्वाण्यप्रकृतानिदोषानुरक्तस्यचवर्ण्यत्वाद्प्रकृतत्वंकाइतिनिर्देश्यःपूर्वाद्यनिर्दृतत्वरूपश्चोत्तरार्द्धेसकृद्धर्मःकुमुदादीनांतुल्ययोगिनाहेतुनिबद्धःआधिक्यमितिअर्थादुपमानात्॥तदयंसूत्रार्थःयदुपमानादुपमेयस्यव्यतिरेकःसव्यतिरेकोलंकारः॥क्षीणइति॥यथेंदुःक्षीणोपिवर्द्धतेनथानारुण्यमर्घातिचित्तेत्वाकापिरुत्सारतीप्रियेणज्ञाताशयेनोच्यतेप्रियायानक्षीणंयौवनंश्रयोनवर्द्धतइतिमाकुपःकेनचिद्दोषेणतन्मनाश्रयेनात्रचंद्रादयौवनेन्यूनगुणंशशिवैलक्षण्येनगतस्यतस्यापुनरागमान अलंकारसर्वस्वेपीथमुक्तंविवक्षितमितियौवनेयादृशमस्तैर्याधिक्येनचंद्रेतादृगितिभावःविपरीतोतिरेकोधिक्यंव्यतिरेकःअधिकत्वंवैपरीत्येचहीनत्वं अनाधिक्यमित्यर्थः॥एवंरुद्रटेपिमानितःइहमाभूदनेनोद्देशनामेवात्राधिकारइतिज्ञापनार्थंतयोर्द्वयोरितियुगपदितिशेषः॥एकतरस्यक्रमेणानुक्तावनुक्तिर्द्वयोरुपमेयोपमानयोरुत्कर्षापकर्षहेत्वोर्युगपदनुक्तावेकानुक्तिःमिलितमनुक्तित्रयं॥शब्देनेतिइवयथादिनेवार्थवतिरूपेणचअर्थेनेति॥तुल्यार्थशब्दतुल्यार्थवतिप्रतिपादितेनक्रमेणयदार्थशब्दःसामर्थ्यार्थस्तदार्थेनसामर्थ्यरूपेणक्रमेणोच्यारब्धा॥आक्षिप्तमितिइवतुल्यार्थाभावइत्यर्थः॥तद्दितिश्लेषेपिहादृशोदाइत्यर्थः॥विरहेतिनीनवारानष्टचत्वारिंशतिःअसीति॥अत्रतुल्यत्वमुपमानगतंगर्वहेतुनिकर्षकारणं॥महाधृतित्वमुपमेयगतमुत्कर्षकारणंसमयाभावहेतुः अतोयुगपद्धेत्वोरुक्तिःतथाचैवेतरस्यजनस्यैवनम्रयोस्यमहाधृतेरितिपाठेमहाधृतित्वस्योपमेयोत्कर्षहेतोरुक्तिस्तुल्यस्यान्यजनस्यैवनम्रयोर्विभाव्यतइतिपाठेतुल्यस्योपमानापकर्षहेतोरुक्तिस्तथेतरस्यजनस्यैवनम्रयोस्यविभाव्यतइतिकृतेतत्कर्षापकर्षहेत्वोर्युगपदुक्तिरित्याह॥चैवेति॥एवंशब्दोपन्यासचनुभेदौ॥एवमन्योन्यमिति॥अर्थादापद्यचनुक्तोपचकेदर्शितदृष्टांतादन्यत्रभेदोस्वेनोह्यः॥अर्थसाम्येयथा॥असौ

ति॥अत्राप्युत्कर्षापकर्षहेत्वोर्द्वयोरुक्तिः इहार्थोपम्येपूर्वत्रशाब्दोपम्येव्यतिरेकस्याद्योभेदः शेषत्रिभेदीस्वेनोह्या॥इयमिति॥अत्रोपमेयोपमानगमकत्वेकत्वेकिंतत्वरूपमुत्कर्षापकर्षकारणमुक्तं अयमाक्षिप्तोपम्येव्यतिरेकस्याद्योभेदः॥यथावाक्षीणःक्षीणोपिशशीति॥अत्रयोवनेनोपमेयेचंद्रेचोपमानेक्रमेणारूढेर्याधिक्यहानीउत्कर्षापकर्षकारणोक्ते अयमाद्योभेदःअनुक्तोन्यभेदस्वयथा॥नित्योदितप्रतापस्यनपमेनानुभाननेअत्रनित्योदितप्रतापत्वमुपमेयोत्कर्षहेतुःयथावानियतिरुक्तेति अत्रोपमेयोत्कर्षहेतुःक्षणादितप्रतापेनेतिपाठेउपमानापकर्षहेतुः॥महीमंडलमाणिक्यप्रतापेननुभानतइतिपाठेतूत्कर्षापकर्षहेत्वोर्द्वयोरप्युक्तिरित्याक्षिप्तोपम्येचतुर्भेदी॥जितेंद्रियेति॥अत्रविद्याचंद्रनिषेधोगाढगुणोत्कर्षहेतुःभंगुरगुणत्वनिकर्षहेतुर्नोपात्तइत्युपमानगतिकर्षहेत्वनुक्तोशाब्दोपम्येश्लेषव्यतिरेकस्यतृतीयोभेदःअखंडेति॥अयमुपमानगतिनिकर्षहेत्वनुक्तावाद्योपम्येश्लेषव्यतिरेकस्यतृतीयोभेदःहरेरिति॥गयोधर्मदानंवाअत्रहरणानुस्मरणंतइत्यादिकमेणात्मार्थेवातिरस्तेनार्थोपम्ये अयमुभयानुक्तोश्लेषव्यतिरेकस्यान्योभेदःशेषद्वयंस्वयंज्ञेयं॥नित्योदितेति॥अत्रोदितप्रतापत्वगोलिप्तप्रभत्वात्मनोरुपमेयोपमानगतोत्कर्षापकर्षहेतुत्वोक्तिरित्युभयोपादानेश्लेषव्यतिरेकात्यचतुष्कस्याद्योभेदः॥भास्वानेवभास्वचेतिभास्वरथारोपादेकत्वप्रतिपत्तिरितिश्लिष्टत्वास्वच्छेति॥रामुच्छसितप्रतिबिंबनिंदुबिंबंयत्रेतितत्तामधुरत्वंज्ञहारननुमुखमिति॥अत्रतृष्णाहरणाहरणयोः कारणोनोक्तेइति॥हयानुक्तिरित्युभयानुक्तोश्लेषव्य

तिरेकोत्यचतुष्कस्यांत्योभेदः॥हिभेदीस्वेनोह्याएवमन्येष्वपिद्रष्टव्यमित्युक्तयाप्रतिचतुष्केकः कश्चिद्भेदोवाच्यइतिस्थितेपियद्दृथक्कृताहरवदितिस्वच्छात्मतेतिदृष्टांतहयमूचेनदेकत्रव्यतिरेकमात्रत्वमन्यत्रार्थश्लिष्टत्वविशेषंज्ञापयितुमतराएवमथावेत्युक्तं॥पृथगिति॥यथोद्भटकुमारसंभवेगौरीमुनौ॥याशैशिरीश्रीश्चतपसामासेनैकेनविश्रुता॥तपसातंकृशीकृत्यदुराद्विद्धर्तामधः॥तयोमाघमासेपिरागेणेतिसंकृशीकृत्येतिहेतूक्तिः॥अत्रतपसेतिश्लिष्टोक्तियोग्यपदंपृथगुच्चे॥स्वयथावासच्चक्रानंदनोप्येषनतुल्यस्तपनस्तवा॥सशरीरसंज्ञायायेनसशरीरःस्मरोभवान्॥अत्रापिहेत्वोरुक्तिरेवाद्यभावादत्रपूर्वत्राप्याक्षिप्तोपम्येद्वयोक्तोश्लेषव्यतिरेकाद्योभेदःअत्रापिश्लिष्टोक्तियोग्यपदस्यपृथगभावःअन्येपात्येकादशभेदाःनव्यत्रश्लेषोपकाराद्यमत्कारीव्यतिरेकइतिनयोरंगांगिभावेसंकरःस्यात् नडयेयोगंहिसंकरोनचात्रहयमस्ति॥गचेविधश्लेषस्यैवव्यतिरेकापरनामत्वात्॥परेव्यतिरेकरूपमंशमाश्रित्यव्यतिरेकप्रभेदतयाश्लेषव्यतिरेकरूपयोक्तं॥येतुश्लिष्टोक्तियोग्यपदस्यपृथगुपादानेभेदास्तत्रश्लेषगंधोपिनास्ति॥एकस्यपदस्यहिरुपादानात्॥निषेधइति॥उक्तविषयत्वंचचतुर्भिष्टत्वंकथं॥सत्यंउक्तमाद्योवक्तुर्भिष्टमेव॥अशक्येति॥वक्ष्यमाणविषयस्यलक्षणमत्रप्रसिद्धत्वमुक्तविषयेप्रस्तुतोर्थःप्रस्तुतत्वादेवविधानार्होनिषेधार्हइतिस्थितेनिषेधोयःसनोपपद्यते॥इतिनिषेधोनिषेधाभासःसंपन्नः॥तस्येतस्यकरणंप्रकृतत्वेनविशेषणंवक्ष्यर्थेअन्यथागजस्नानतुल्यतास्यादित्याह॥निषेधइवेति॥हिविधइति॥उक्तविषयत्वेनकेमथवयंपरमार्थोचमाक्षेपः॥

वश्यमाणविषयत्वेनानयनरूपमाक्षेपइत्यर्थभेदादाक्षेपोद्वोविशयश्चात्रशब्दानुपात्तत्वा
दुभयः तत्राद्येभेदेकथनस्यैवनिषेधः द्वितीयेतुकचिदस्तुनः कचिदस्तुकथनस्यनिषेधः एवंहीति।अ
थिगद्दिकिमपिकस्यापिरुचतेनानिरूपणमिति।अस्मथवाअविचारितरमणीयकार्यारंभकारिणीश्रियतांभा
णिष्यामि॥अविचारितेति॥कार्यमन्यासक्तेपित्वय्यनुरागरूपंअत्रनभणिस्समितिभणननिषेधादिति
लभ्यते॥यत्तस्यास्त्वद्वियोगेसासावरुद्धाजायतेमावक्तुमशक्या॥इष्टार्थानिषेधमिषेणात्कर्षितइतिभा
वःकामावरुद्धाविशेषेणचवक्ष्यमाणत्वात्सचनमित्याद्योभेदः किमनेनोक्तेनेति॥कैमर्थ्यातपरमा
रुंचनंनश्रुमइतिनिषेधः॥तद्वारेणतस्यास्त्वयोगेज्योत्स्नादिस्फुलिंगव्यापारहेतुःस्यादितिस्फुटो
यमर्थोन्यत्रापिदृष्टवान्॥स्फुलिंगव्यापाराणामानंत्यान्मिकोविशेषःकिमनेनोक्तेनेतिसामान्यतो
पक्रांतेनश्रुमइत्यसंविज्ञानपदनिबंधनत्वान्निर्वाहइत्यक्तविषयत्वा॥अत्रवस्तुनिषेधःश्रमो
दितिश्रयादिदमसतिकोपेनघटतइत्यादौवस्तुकथननिषेधःतथाहिभण्यमानस्यप्रसादस्यनि
षेधमुखेनैवकोपरागनिवर्तनेनावश्यस्त्रीकार्यत्वंविशेषः॥नदेवमाक्षेपइष्टार्थस्यनिषे
धोनिषेधस्यानुपपत्त्यास्त्रीकत्वंविशेषप्रतिपादनंचेतिचेन्नैषदोषायथाःनासवारव्यंकरणंगदस्यअ
त्रयौवनंनिमित्तंमत्तताहर्षवाचकत्वान्मदस्यहेविध्यप्रतिशयोक्त्याभेदः अतिशयोक्त्यनुप्राणि
तात्वेपाङ्गेयागकगुणहानौविशेषोक्तिरित्येकेआरोपितवैशिष्ट्यरूपकमेवान्येइमंमन्यंते गत
हिपर्ययेविशेषोक्तिरितिताह॥विशेषोक्तिरितिनिद्रेति॥क्वरत्नंरविःभुजंगःपतिःअत्रनिद्रानि
रत्यादिहेतुसामग्यसत्यपिरत्नेपत्यागरूपकार्यस्यावचःप्रियस्वप्नागमादिहेतुर्गम्यःकपूरइ



कुर्वंतीतिसेवाव्यवहितोहेतुः॥कार्यक्रियायाःफलमितिवेयाकरणावमन्यंतेनान्यंफलंति॥कार्य
स्यकविनाप्रतिपादनंनानुभवनंहेतुंविनाकार्योत्पत्त्यसंभवात्॥अत्रप्रसिद्धतरेहेत्वनुपलब्धि
हेत्वभावः॥अप्रसिद्धस्तुहेतुवस्तुतोरूपेव।अतएवविशिष्टतयाप्रसिद्धतरहेत्वनुपलब्धिरूपयाका
र्यस्यभावनापर्यालोचनाविभावनाहेतुनिषेधेनचहोपक्रांतत्वात्॥बलवताकार्यमेवबाध्यत्वेनप्र
तीयतेनहेतुनिषेधइत्यन्योन्यबाधकत्वानुप्राणितादिरोधालंकाराद्भेदः हेतुनिषेधबाधप्रतीतिस्तु
ज्ञप्त्यपेक्षाज्ञप्तिश्चोत्पत्त्यपेक्षयाननासन्नेति॥नचविभावनाप्रयोज्यकार्यभावः यथाकार्यभावाद्धवे
तुनिषेधेनबाध्यतइतिभवति॥तत्रभवनापेक्षोबाधःतथानाभवन्नेवहेतुनिषेधः कार्यभवनेनापि
बाध्यतेकिंतुभवनस्यतत्रबाधस्तत्रयाज्ञाप्यतइतिहेतुनिषेधबाधोज्ञप्त्यपेक्षएवेतिज्ञप्तिर्भवनापेक्षया
पश्चाद्भावित्वेनासन्नेति॥यद्वासामान्येनमिथोबाधेसत्यपिहेतुफलभावविशेषेणास्याविरोधाद्भेदः
कुरुतमितेति॥अत्रनछिन्यश्चिनीपद्मिन्यारव्यास्त्रीचेतथाघातादिहेत्वभावेपिरुगादिकार्यमुक्तं।तत्र
वियोगित्वंकारणेगम्यतोःनुक्तनिमित्तेयंउक्तनिमित्तापेक्षायथाःनासवारव्यंकरणंगदस्यअ
त्रयौवनंनिमित्तंमत्तताहर्षवाचकत्वान्मदस्यहेविध्यप्रतिशयोक्त्याभेदःअतिशयोक्त्यनुप्राणि
तात्वेपाङ्गेयागकगुणहानौविशेषोक्तिरित्येकेआरोपितवैशिष्ट्यरूपकमेवान्येइमंमन्यंते गत
हिपर्ययेविशेषोक्तिरितिताह॥विशेषोक्तिरितिनिद्रेति॥क्वरत्नंरविःभुजंगःपतिःअत्रनिद्रानि
रत्यादिहेतुसामग्यसत्यपिरत्नेपत्यागरूपकार्यस्यावचःप्रियस्वप्नागमादिहेतुर्गम्यःकपूरइ

ति॥अस्यामपि फलाभावः कारणसत्तामेव अत्रदाहरूपेसत्यपिकारणेद्रव्यरूपविरुद्धधर्मेणाशक्तत्वकार्यानुत्पत्तावार्यवीर्यत्वंहेतुंसाक्षादुक्तःहरतापीति।अत्रतनुद्रव्यस्यहेतोःफलंचस्नेहस्यापरंनोक्तं॥निमित्तंचात्रप्रतीत्यगोचरत्वादचिन्त्यं।एकगुणद्रव्यनिकल्पनायांसाम्यदार्ढ्यंविशेषोक्तिरितियदन्यैरस्यारूक्षणंकृतंसास्मन्मतेरूपकभेदएव।यथाअतैलपूराःसारतप्रदीपाइति।अस्यामपिफलाभावःकारणसत्तामेवबाधतेअतएवमिथोबाधजीवितादिरोधाद्विरुद्धते।यथासंख्यमितिसंख्यापरलक्षिनक्रमानतिक्रमेणपदार्थानामन्वयेयथार्थंयथासंख्यंक्रमइतियावत्।क्रमिकाःक्रमवर्तिनःबहुवचनमतंत्रतेनहयोरप्यर्थयोर्यथासंख्यं॥एकइति।अत्रशैत्यौष्ण्यविनयशीलावर्ण्यत्वेनोद्दिष्टा॥नारांयथाक्रमंदेवदिद्विविधन्मृगदृशामनुनिर्देशःएकस्त्रिधेति॥बाक्याद्यैर्न्यायविरोधोपिदृक्रमिकवचनानामसमस्तत्वात्संबंधस्यातिरोहितथेशाद्यंयत्नतुक्रमिकाणांसमासःक्रियतेनत्रार्थानुगमान्लोचनयाःवयवगतक्रमसंबंधप्रतीतावार्थत्वंतत्स्वयमूह्यं॥तदन्येनेति।विशेषेणसामान्येनवाअर्थोतरस्यैवविज्ञातीयस्येवस्तुनोन्यासोर्थांतरन्यासइतिव्युत्पत्त्येतिप्रतीयतेयदत्रहेतोर्हेतुमतासहव्याप्तिर्दृष्टानतुस्पष्टाकथंचित्प्रत्येयत्यर्थः निजेति॥अत्रैवशब्दोप्यर्थेव्यस्तसंबंधोवाअत्रसमान्यमुत्तरार्द्धेपात्तविशेषणासनर्थितंरूपितेति॥मद्द्यशब्दउन्मादार्थःकनारीत्यादिसामान्यंपूर्वोक्तस्यविशेषरूपस्यसमर्थकंगुणानामितिगतिःकार्याकृष्टोवशः।अत्रगुणानामितिसामान्यंगोर्गरीतिर्वैधर्म्यरूपोविशेषःदोरात्म्यादितिनियोजनेहेतुःवैधर्म्यविशेषस्तुपूर्वार्द्धार्थसमर्थनेहेतुःअहोइतिमेइतिविशेषःतथाचेतिसा ७३

मान्यंनयोःसमर्थ्यसमर्थकभावःअप्रियेवाच्यमितिसहृदंप्रतीतिशेषःअत्रापरार्द्धमितिवचनादधन्यत्वाक्षेपः॥नहिरुद्धंधन्यत्वमितिवैधर्म्येणतन्नस्यमुखादित्यादावप्रस्तुतप्रशंसायांजडादिवत्तेनविशेषेणवाच्येनसामान्यंगम्यंसमर्थ्यते।अत्रतुसामान्यविशेषयोर्द्वयोरपिवाच्यत्वमितिविवेकःयद्वान्योक्तौविशेषोनसामान्यसमर्थनायेनोच्यते।किंत्वन्यथेतिनथाचहिशब्दःक्वचित्प्रयुज्यतेक्वचिन्न समर्थकस्यकदाचित्पूर्वंपश्चाद्वोपन्यासः।अविरोधेपीतिःअविरोधोविरोधोनस्यादितिस्थितेयद्विरोधंनोक्तिःसेवानुपपद्यमानाविरोधाभासपर्यवस्यतिनित्यमेवप्रत्याश्रितत्वाज्जानेर्नजातिद्रव्ययोर्विरोधइतिब्रुवन्रुद्रटोनवधेर्दीनन्यते।नहार्तोजानेर्गुणाश्रितत्वस्यापिभावात्।अगीनवेतिअत्रनस्निग्धत्वादिद्रवत्वजान्यैर्वियोगवशाद्विरोधःपरिहृतःगिरयोपीतिवत्रजोपिअत्रत्वमेवमहासैन्यवान्गोगौरोबिरुदीर्णश्चेतिभावःअत्रगिरित्वमरुत्वादिजातीनांक्रमेणरूक्षत्वपर्यायानुत्तरत्वबलपर्यायमंदत्वाभीर्यादिरूक्षत्वरूपैर्गुणैःसहविरोधःयेषामिति॥धाराधरासिःस्नेहोरुधिरार्द्रत्वमपिअत्रपोशत्वजातिमंडनक्रियेविरुद्धे रजनीति।अत्रशाकरत्वजानेर्जनार्दनद्रव्यस्यचविरोधःसतनमिति॥अत्रकाठिन्यसंकुमार्यगुणौविरुद्धौ॥पेशलमिति।अत्रपेशलत्वपरुषत्वगुणौदहनप्रमोदक्रियाभ्यांसहविरुद्धौ॥यन्मार्गणेति।यन्मार्गणागानगतिःसातःपतिःअत्रदृढत्वरूपगुणेनोजदरूपद्रव्यस्यविरोधःपरीति॥जडयतिशीनरुयतिमोहयतिचतापःबबेदोपि।अत्रजडीकरणतापकरणरूपेक्रियेविरुद्धेवस्तुसौंदर्येणतदप्राप्तिपर्यवसानेनपरिहियते।अयमिति।अत्रजरुधिःपीनइतिद्रव्यक्रियेवि

रुद्रमुनिप्रभावेणसमाधीयेते।समदेति।अत्रगंगायमुनारूपद्रव्ययोर्विरोधःगंगापियमुनाजानंति।
तिरूपेणानुनदीत्वजातेर्विरोधःगर्वविक्तविषयत्वेनविरोधस्यदर्शनात्कथयतिमपिकलत्र
वल्लभमित्यादौश्लेषगर्भत्वेसंकरइतिकश्चित्रुद्रटस्तुविरोधप्रतिभोत्पत्तिहेतुंश्लेषमाह।श्लेष
वशादेवस्वात्मलाभत्वाद्विरोधस्यनश्लेषेणसहसंकरःस्वस्वहेतोर्लब्धात्मलाभानामलंकारणां
मिश्रत्वेसंकरइतिसंकरलक्षणात्।एकविषयत्वेविरोधःभिन्नविषयत्वेत्वसंसृत्याद्योलंकारःस्व
भावोक्तिरिति।इहचवस्तुस्वभावचर्णनमात्रेनालंकारः।नत्वेसर्वंकाव्यमलंकारःस्यात्तस्मात्सामान्य
स्वभावोलौकिकोर्थालंकार्यः कविप्रतिभागोचरस्यत्वनएवनभिन्नस्यैववस्तुस्वभावस्योक्तिरल
कारःस्वयोरितिस्वकीययोः क्रियाव्यापारःसंस्थानंस्वाभाविकरूपंपश्चादिति।प्रोथोमुखाग्रंनुदंमुखे
अत्रधूलिधून्वाइतिवर्णोक्तिः।शेषगोघ्रप्रसारणंगदीर्घीकरणादिकंक्रियासंस्थानोक्तिःमुखेनिंदति
श्रोत्रीनिंदास्तुतिस्तुनिर्वाहेगत्येकोभेदः।गतहेपरित्यहिनीयोभेदइत्याह॥व्याजरूपेति।व्याजरू
पानिंदाद्वारिकेत्यर्थः।व्याजेनेति।वस्तुवृत्त्यानिंदेत्यर्थः।हित्वेति।लज्जायोमज्जनंबुडनंनिर्लज्जत्व
मित्यर्थः हेत्वपत्वद्विधोनिर्दाक्षिण्यालक्ष्मीतुल्यंनिर्लज्जंकिमपिनास्तीतिभावः।हेहेलेति।अत्रविप
रीतलक्षणयावाच्याद्यस्तोत्रतीतिः॥अत्राप्रस्तुतप्रशंसासङ्गवेपिनसंकरत्वं व्याजस्तुत्यप्रस्तुतप्रशंस
योरुक्तनयाभेदेनप्रतिभासात्।उक्तनाभेदेहिसस्यान्नहिसंसृष्टिरितिचेन्न।अन्योन्योपकार्योपि
कारकत्वेनमिथोनैरपेक्ष्याभावात्।मणियुक्तहारवदेकगवार्थप्रकृतोलंकारइतिभावः।उच्चैवि

DR BHAU DAJI



विरोगइतिउद्भटनर्शालायाःसहोक्तौडयोरपिप्रकृतयोरप्रकृतयोर्वागग्रहणान्कालनिकर्मो।
पम्यंनत्रतृतीयांतस्यगुणभावादुपमानत्वंशेषस्यप्राधान्यादुपमेयत्वं।इयंमालयासहोक्तिः।के
वलसहोक्तिस्तुचसैनेपद्यवेःसार्द्धंगोदासीजनोभवेदित्यादिनियमेनकार्यकारणनियमविपर्यय
रूपाभेदाध्यवसायरूपातिशयोक्तिमूलत्वमस्याःयथाप्रतीयमानोपमात्वेपितत्वारोपादिरूपविशेष
भावाद्रूपकाच्चलंकारांतरमुपमानोभेदेनोक्ताः॥तथेयमपिसहार्थसामर्थ्यावसितसाम्ययोगरूपविशे
षात्तस्याःपृथगुक्ताःउपमारूपंव्यंग्यंतुरूपकादिषुगुणीभूततत्वारोपाद्यर्थस्यैवचमत्कारित्वात्तत्रा
न्यइतिसनशोभनःसूत्रापेक्षयाव्याख्ययं।क्वचित्तुयत्रान्योसन्नर्थेनरइतिपाठः।नदपेक्षयाव्यक्ति
नाव्याख्यानमस्ति।अरुचिरितिरुचिरहितोशोभनःमृगेतितथाहिप्राकृतोमोहितःकिमपिनासीत्।सह
देतिकूटमित्रंसतस्यासीत्विनाशंविनापिविनार्थविवक्षास्यात्।यथासहोक्तौसहार्थविवक्षा।ते
ननिरर्थकंजन्मगतंनलिन्यायथानदृष्टेतुहिनांशुबिंबं।उत्पत्तिरेवारविनिष्फलैवदृष्टाविनिद्रान
लिनीनयेनेत्यादौविनोक्तिरेव।नुहिनांशुदर्शनंविनानलिनीजन्मनोशोभनत्वप्रतीतेः।अत्रा
रुचिरित्यत्रहरणंमिथोविनोक्तिभेदोक्तौ।हित्वेतियत्रैवमेव।यदेकत्राशोभनत्वमपरत्रशोभनत्वं
विनोक्तिरुक्तवैचित्र्याभावाच्छुद्धमात्रयोगेत्वलंकारकल्पनेहाधिगाढोक्तावप्यलंकारत्वप्राप्तेश्च
विनोक्त्यलंकारेणमन्यंतेन्ये सहार्थबलात्साम्यप्रतीतेःसहोक्तिस्तुयुक्तैवा अर्थानामितिअर्थ्य
तेमार्गइतिव्युत्पत्त्यार्थाःपदानिवाक्यानिचतेषांसमूहोवचनमतंत्रंतेनेकंडवहुनिवादत्वाव्युत्क्रमेणविषमसमसं

रच्यानामादानं यत्र तत्रेषा स्यात्। समादन्यदसमं तच्च न्यूनमधिकं वा समन्यूनाधिकानां समाधिक
न्यूनैर्विनिमये परिवृत्तिर्यथा रूक्षाणामिति गतं चारुत्वमयत्नादत्ते। अत्र रूक्षस्य गादेः समेन गकेनैकस्य वि
नियमः पूर्वार्द्धे। उत्तरार्द्धे त्वर्द्धेनैकेन न्यूनसाध्यादिरूपस्यानेकस्य॥ नानेति॥ विप्रलंभो भ्रांतिरथवा
नानिर्विप्रलंभो निश्चितो निर्विघ्नो वा परिणामविधिर्यस्याः सा तथा॥ न्यूनेन प्रहारूपेणोत्तरस्य भू
रूपस्य भाविकमिति॥ भूतभाव्यर्थानां लोकान्तरेणाद्भुतत्वाद्व्यस्तसंबंधशब्दसंदर्भसमर्पितत्वाच्च
प्रत्यक्षायमाणत्वं भावइति। कवेर्भावआशयः श्रोतरि प्रतिबिंबत्वेनास्तीति भावः स्वभावोक्तौ कवि।
प्रतिभाविशेषोत्तीर्णकवस्तुस्वभाववर्णनं सर्वसाधारण्येनाचित्तसंवादसंभवात्तु लोकान्तरवस्तू
नां स्फुटत्वेन तटस्थतया प्रतीतिरिति चारुवस्तुस्वभाववर्णनान्नेषा स्वभावोक्तिः। न चेदमद्भुतपदार्थद
र्शनाद्भूतभाविप्रत्यक्षत्वप्रतीतौ काव्यलिंगलिंगिभावेनाप्रतीतेः हेतोरिति। अयं भावः यत्र हेतुः
कारकरूपस्तत्काव्यलिंगं ज्ञापकहेतोस्त्वनुमानालंकारः। काव्यग्रहात्काव्यलिंगेव्याप्तिपक्षधर्मो
पसंहारादयोनयस्युः वाक्यार्थवत्पदार्थोपि यदेकोनेकस्य चपुरिति अत्र पादत्रयार्थोनेकवाक्यार्थरूपो
ऽस्य पदार्थस्य हेतुः तथा वपुरादुर्भावादित्युक्त्यानुमानमप्यत्राग्नि परेतेन सहभिन्नदेशत्वाभावा
द्वाक्यार्थीभूतस्य हेतोर्न संसृष्टिः किंत्वनुमानस्योत्थापकतया वाक्यार्थीभूतहेतुप्रत्यंगभावेन संकरः।
संप्रतित्वानमन्मुक्तः सः नमेपि भाविनि काले निस्तनुः सन्ननतिमानित्यर्थः। यथा घटकारणं मृद्घट
रूपेण परिणमति तथापराधहृदयस्य जनकमनमनगपराधतया त्रपरिणतं एकवाक्यार्थ

तोदाहरणमन्यत्तोन्नेयं॥ प्रणयीति॥ इयं मालतीवधोद्यता घोरघंटं प्रति माधवोक्तिः। इह शस्त्रोपक्षे
पेण रूपकहेतुः शस्त्रमित्यपक्षिपनदृतिचानेकपदार्थनयोक्तः पूर्वत्र वाक्यार्थगत्या हेतुलिंगत्वेन
बद्धोऽत्र तु शस्त्रमुपक्षिपनदृतिविशेषणत्वेन पदार्थगत्या बद्ध इति भावः भरुमिति॥ अत्रापि महामो
हेरूक्त्वात्तोकोक्तेर्दित्वं हेतुर्विशेषणतयैकपदार्थमोक्षस्य महामोहरूपेणाद्भुतकमपि॥ वाच्येति
वाच्यवाचकावर्थशब्दौ विविक्तेति॥ भिन्नेन प्रकारांतरेणार्थसामर्थ्यात्तेनेति यावत्॥ अत्र गम्यार्थेभि
र्व्यंतरेणापीयते॥ अप्रस्तुतप्रशंसायांत्वप्रस्तुतउच्यते॥ गम्यस्त्वाक्षिप्यनदृतिविवेकः व्यंग्यम
र्थीति योग्यतयानिर्देशः शब्देनोच्यनदृतिगदेनमानेननिवासश्रीतिरुक्तेति॥ रूपसंग्येतरश्लोक्ते
नेतिभग्येनरेण॥ यथेतियेनप्रकारेणशब्दसंसर्गासहात्मनैकघनरूपतान्मनावाच्यंग्येप्रतीय
मानतयाशब्देनोच्यते॥ क्रमाक्षविविकल्पप्रभवः शब्दस्तथाभिधानुगशक्त इत्यर्थः अतोत्रनध्वनि
रितिभावः गतदेवदृष्टांतेनाह॥ यथागवीतिदेष्टइति। निर्विकल्पकेनगोचरीकृतेनेति॥ अयंभावः
अभिन्नासंसृष्टः स्वरूपेणाकारोनिरंशोनिर्विकल्पकेनदृष्टः पश्चादविद्यावशेनभेदसंसर्गाभ्यो
विकल्पगोचरीक्रियते॥ भेदसंसर्गोविकल्पस्यैवव्यापारः सहिनिरंशत्वादभिन्नमप्यसंसृष्टमपिन
स्तुगोः शाक्वश्चकइत्येवंभिन्नभिन्नमप्ययंगोरयमपिगौरित्येवंसंसृजति॥ उदात्तमिति॥ इदंनेत्थं
यंस्थितस्यवस्तुनोवर्णनयास्वभावोक्तिर्भाविकाभ्यांभिद्यते॥ नहिपूर्वयोरेत्थंवर्ण्यनेवविप्र
तिपत्तिरुत्थापितत्वंत्रिषयस्यैवमुक्तइत्यतिशयोक्तिरेवेतिचेन्न अन्यथान्यनयाध्यवसायाभावात्

अन्येश्वर्यैर्यथकरवन्मुक्तादेः पंक्तीकरणासंभवेयदेवमुक्तिः संयमसंबंधेसंबंधात्मिकाति
शयोक्तिः॥अथपंक्तीकरणंसंभवतितदाजातिक्रियाद्रव्यमदस्तुवर्णनेः मुदान्तमपिरम्यादितिवि
वक्षायांनिर्विषयमिदमुदान्तंअर्थादिति॥सामर्थ्यादुपलक्षणीयंरवस्वेनरंगभूतेइत्यर्थः॥तदिदमिति
अत्रदंडकारण्यवर्णनयोगिभूतेरामचरितस्योगभावः महद्भिराश्रितेत्यरण्यवर्ण्यस्यादितितात्प
र्यं॥अरण्यमात्रोपलक्षणीयंप्रधानीभूतमित्यर्थः॥रामस्यवीरचरितमुपलक्षणमित्यर्थः॥वीररसंगा
भूतेरसध्वनिःस्यादित्याशंक्याह॥नचेति॥वीररसोनांगीत्यर्थः॥तदेवाह॥तस्येति॥वीररसाश्रया
रामस्तावदङ्गंकिंपुनारसः ननुरसस्यांगत्वंरसवदलंकारःस्यान्नअस्योदात्तस्यतदपवाद
त्वात्ततदपवादत्वाकर्मनोनिर्विषयमुदात्तंरसमुच्चयइति॥अत्रतुल्यकक्षतयाह्यनयोर्मिलिताः
कार्यंसाधयंतीति॥समाधौत्वेकस्यहेतोः कार्यंप्रतिपूर्णंसाधकत्वेन्यस्तुकाकतालीयन्यायेना
पतंतीति॥ननुत्रतुल्यकक्षतेत्यनयोर्भेदःसमुच्चयेहितुल्यकक्षाणामेवस्यान्नपृथगितिरु
द्रटवृत्तेनहिसंघोगासंघोगसदसंघोगेःसन्निधौचेनतथात्वेतिभावः॥कुरुमिति॥अत्रामरुकु
रुस्यसतःसद्भिरित्यादिभिःसमुच्चयःएकैकस्यदर्पहेतुत्वेतुल्यकक्षत्वंदुर्वारःस्मरेत्यत्रतुस्मर
मार्गणानांदुर्वारत्वेनारतांतादशैरेवदूरत्वात्प्रियादिभिःसमुच्चयःतारुण्मादेश्चस्वतश्चारुत्वे ०६.
पिविरहेणाचारुत्वंतथैकमेववस्तुसदसच्चेतादृशेतादृशेनसदसतायदायुज्यतेतदासदसंघो
गः यथाशशीति॥स्वाकृतेःरूपस्यधनपरायणेधनलुब्धःनृपांगणगतोराज्ञःप्रसादवित्तः

पुमान्सतद्रूपःसन्नरवस्तुतयाचारुन्नअत्रशशिस्वयंसन्नधःसरत्वेनासन्नकामिनीतिसन्नगलि
तयौवनत्वमसन्नरागमग्नेपिविशेष्यद्वारेणसत्तांविशेषणद्वारेणसत्तैकस्यवस्तुनःसर्वत्रज्ञे
या॥इहविशेष्यस्यसत्वंविशेषणस्यचासत्वंप्रक्रांतंनतोनृपांगणगतइतिविशेष्यतयासद्व्याख्येयं॥
रवस्वइतिविशेषणतयाचारुन्नाअन्यमतानभिप्रायेणविशेषणविशेष्ययोरत्रवैपरीत्येप्रक्रमभंगः
नथान्नृपांगणगतःरवस्वइत्यसन्नअन्येतुसंतइतिसमुच्चीयमानस्यसतस्तादृशेनासतायोगइतिव्या
ख्यायांतुसद्दचरशिनोर्थादुष्टइतिरूपःप्रक्रमभंगःतथात्रसन्नरागरसनोःसत्वमेकस्मिंश्चवस्तुनइति
विचक्षितं॥अतरागचारुत्वेनोक्तःप्रविष्टान्यपिशाच्यादीनिप्रकारेणव्यधाहेतुत्वेनोक्तानि॥दुर्वाराःस्म
रेत्यत्रतुकथंसोढव्यइतिसर्वथादुष्टत्वाभिप्रायेणोपन्यासइतिविवेकः॥ गुणोन्वेति॥गतेनेत्यक्रियाद्व्य
त्वेनसमस्तत्वेनचक्रमेणव्युत्क्रमेणचगुणक्रियाणांत्रिधान्वयःसमुच्चयः॥विदग्धेनसकरुणेकुरुइति
अत्राभिन्नाधारयोर्वैमत्स्यमालिन्ययोर्गुणयोःसमुच्चयः॥अयमिति॥अत्रनादृश्योरेवोपनतइतिभवि
तव्यमितिचक्रियया॥करुषेचेति॥अत्रकालुष्यगुणपानक्रिययोःधुनोतीत्यत्रैकाधिकरण्यक्रिययोःरु
पाणपाणित्वसाधुत्वादोसिद्धरूपत्वात्गुणे॥तयोःक्षितिःस्वर्गश्चभिन्नोदेशःनवाच्यमितियथाक्रं
रुद्रटेन॥नदंचपूर्वोदितप्रत्ययेनसहसमुच्चयःयोढा॥क्रमेणेति॥गतेनपर्यायइतिसान्वयंक्रमग्र
हणाच्चयुगपदेकस्यानेकत्रचतनोविशेषालंकारः अतस्तत्रापियुगपदित्यक्रमोक्तिर्बाधइत्यत्रैकस्य
तनुत्वादेर्यथोक्तिःपूर्वमुरवस्यउपमानसज्ञावात्सदिर्नीयत्वमितिविनिमयोघटते॥पूर्वोदितयोदा

हरणानन्वाश्चर्येति अत्रैकस्यबहुषुचनिःबिंबोष्ठेति अत्रपूर्वाश्चर्यात्यागादेकस्यैवरागस्यहृदि
वृत्तिर्निबद्धा यथावेति प्रकारानतरार्थंरागस्येति ओष्ठेरागस्तोदृक्तज्ञःहृदितुप्रमाण्यःगकस्यानै
कत्रस्थितमुक्ताकरणमुद्दाल्यते नेत्राणेति तत्तेषांश्रीसद्दाररत्नाहरणहृदयमेकरसंबिंबाध
रेप्रियेणानिवेशितंकुसुमबाणेन तत्सामर्थ्यनेषांदेत्यानामिंद्रस्यापिभयकृतांश्रीबधूरत्नानामासा
मस्येनहरणेतत्परमपिकुसुमबाणेनमृदुशस्त्रेणापि सकलरत्नसारंबिंबाधरंचित्रमेपरित्याज्य
मनश्चुंबनादिसत्कृतमित्यर्थः बिंबाधरःसकलरत्नेभ्योधिकइतिव्यंग्यव्यतिरेकोपिअन्यत्तुसकल
रत्नसारतत्स्त्रीधरइतितेषांनत्रप्रीतिर्वास्तवीतिव्यंग्योपमागूढःअतिशयोक्तिगर्भनामसर्वत्रज्ञेया
मधुरिमेति अत्रैकस्मिन्वचस्यविषममत्यन्तंनिबद्धनंदेवतिवचननंदृढमितिअत्रैकस्मिन
हिजानेकंगाढादिदृढैःक्रियमाणतथानिबद्धंतथात्रनानाशक्तिगाढादिव्यज्यतावत्तत्तुकेनापिस्वीक्रि
यते परित्यक्तोतुयदेकेनत्यज्यतेनदन्येनगृह्यते क्रमेणेत्यधिकारान्नसमुच्चयालंकारत्वं इ
तुरिति अन्ययव्यतिरेकेणनात्समक्षसत्वेविपक्षव्यावृत्तिश्चक्रमेणोच्यते पक्षधर्मत्वंच
नोक्तमितित्रैरूप्यंधर्मोक्तादिस्तत्रास्तित्वमयोगव्यवच्छेदःव्यापकस्यैवग्रहादेः यत्रेति कोने
गताःकामिन्यःअत्रकामिनीरूपाधर्मीभूत्वाव्यापारहारणबाणपातःस्मरस्यागमकत्वसाध्यंकारो
नररहितंसाधनंनिर्दिष्टं क्वचिदलंकारानरगर्भितत्वेनहेतुर्निर्दिश्यतेस्वयंयथा यथापंकजिनी
पत्रपदोघःप्रगुणीकृतःतथामन्यवियोगिन्यःस्मरभिहतघातिताः प्रगुणीकृतइतिप्रगुणीकृतमार



ध्वः अत्रस्वकमलंकारांतरं॥रावमेकत्रप्रौढोक्त्या॥अन्यत्रत्वलंकारांतरगर्भीकारोत्तर्कानुमा
नवैलक्षण्येनदर्शितमिति॥अयंभावःसाध्यसाधनयोरुक्तिरलंकारःनेत्वक्रमेणव्युत्क्रमेणवाभव
तीवैचित्र्याभावोक्तिर्नचित्तयेति॥तस्मात्रुद्रटवन्नवाच्यंमहोजसइतिसमीहितुकर्नुअत्रधनुर्भृत
इतिविशेष्यंशेषाणिविशेषणानि॥महोजसइतिसबलत्वेनस्वामिकार्यकरणेशक्ताइत्यभिप्रायो
त्थविशेषणस्यरावणेपिविशेषणेषुअत्रव्यंग्यस्यांशस्यवाच्योन्मुखत्वमितिनध्वनिविषयतापरि
करइतिनामसान्यंतनुपुष्टार्थंग्रहणाद्दोषत्यागमात्रमेनदित्याशंक्याह॥यद्यपीति॥नन्वेवेति॥अयं
भावःअपन्हुतौकिलोभयनिष्ठंसाम्यंअत्रनुप्रकृतस्यैवसद्भावात्प्रकृतनिष्ठमेवसाम्यंयेकालनाकुटिल
नामिवनत्यजंतीतिसमुच्चितोपमायांतत्अत्रापिप्रकृतनिष्ठमेवसाम्यंशैलेंद्रेतिशैलेंद्रेणप्रतिपाद्यमा
नायागौरीतत्करास्पर्शेशैलेंद्रकरस्पर्शोपिशिवस्यविघ्नेव्यासंगोनिरोधःतस्माद्भेगोभयंसात्त्विक
भावइत्यर्थःअसमंजसनिरंकुशकर्तव्यतात्रसंगापन्नवाकुरुइतितात्पर्येउद्भटमनव्याजोक्त्य
भावादत्रापन्हुतिःतथात्रसोत्कंठादिनोद्भिन्नोभावःशैत्यप्रक्षेपादुत्कर्षितोपिसस्मितत्वेनपुनरुद्भि
न्नत्वेनप्रकाशितस्तथाप्यस्यापमात्रचिंतयास्यालंकारस्योद्भवः॥परिसंख्येति॥परिवर्जने॥
ततःकस्यापिपरिवर्जनेनकस्यचित्संख्यानंचर्यत्वेनगणनं। सम्यक्प्रथनंवाप्रमाणांतरावगत्त
प्रतिपाद्येनज्ञानंप्रयोजनांतराभावादिति॥सदृशावस्त्वंतरव्यवच्छेदरूपंप्रयोजनंहित्वानान्यत्प्र
योजनमस्ति॥यदामन्यंतेति॥यच्छब्दपूर्वोक्तपरामर्शेकिमासेव्यमित्यत्रश्लोकेशास्त्रेप्रमाणज्ञा

तमपिरंगानदादिप्रश्नेसतिसंव्यध्येयादितयाक्रमेणकामिनीसेवातद्ध्यानपापहिंसानांनिषेधायोक्तं निषेधश्चात्रगम्यः निषेध्यंगम्यत्वेनोक्ताप्रश्नेसतिवाच्यत्वेनाह॥किंभूषणमिति॥आर्यैश्चरितमाचरितंअत्रयशःप्रभृतेर्भूषणत्वादिकमागमनोज्ञातमेव॥नरत्नमित्यादिनिषेध्यंशाद्धनमनुपूर्वोदाहरणइवगम्यं॥प्रश्नपूर्वकथनेभेदइत्यागुक्ताप्रश्नाभावेहिभेदोमाह॥कोदित्यगितिकचनिचयनतुवाचिचित्तेवेतिगम्यंकरादोरागोनपरपुंसिकुचयोःकाठिन्यंनचित्तावयवोनरयोश्चक्रुपोश्चपल्वंनाचरणे॥निषेध्यश्चात्रगम्याःभक्तिरिति॥युवतिरूपंकामाख्यमितिविग्रहः॥अत्रनविभवइत्यादिनिषेध्याःशाद्वाःश्लेषसंपर्कस्थानीयचारुत्वं॥यथायतिषदंडग्रहःकरपादाविवाद्यचित्रेवर्णसंकरइत्यादि॥आयुरितिघृतंहेतुरायुर्हेतुमत्॥लक्षणायानयोरभेदः॥आदिशब्दादन्येपिलक्षणाभेदाःषट्त्रिंशाः॥परंयासादृश्यालक्षणानस्यारूपकादिसङ्कावादेवचित्र्यंनान्यस्यांअविरलेति॥अत्रवसंतकालोहेतुःशोषहेतुर्नतुकमलविकासहेतुत्वात्तत्कालोपिविकासःगवमस्मेपिनतुविकासयतिमदयत्यानंदयतिपोषयतिबिभर्त्तीतिरुद्रटाद्याद्येनव्युत्पत्तिःहेतुहेतुमतोरभेदाभावप्रसंगात्समाम्नासिषुरितिभामहोद्भटाद्याःअव्यभिचारितयाविकासादेर्नैरन्तर्येणकरणमिहोपचारात्प्रयोजनंव्यङ्ग्यंतच्चगुणीभूतव्यंग्यमहिम्नेवेतिअत्रैवकारेणप्रतिपाद्यतेतिअस्मन्मतंकाव्यलिंगमेवहेतुःरुद्रटरुय्यिकभट्टादयः॥हंसानांसरोभिःश्रीःसार्यतेसारक्रियतेतिसारणक्रियेकोधर्मस्तनोदीपकमिदं॥नदसन्॥हंससरसोःप्रकृतत्वात्प्रकृताप्रकृतत्वेहिदीपकं॥प्रतिवचनेति॥उत्तरश्रवणादनुक्तोपिप्रश्नोःवगम्यतइतितात्पर्यं॥तत्रैवेतिप्रश्नेउत्तरमुत्तरारव्यालंकारःवाजिणिजकइतिदेताःकुतोस्माकंव्याघ्रकृत्तयश्चयावद्दिक्तुलितालकमुर्वीग्रहेविलसतिस्तुयाकृत्तिश्चर्मस्तुपावधूःपरिसक्कापरिचक्कने॥क्रीडनीत्यर्थःउत्तरस्येतिप्रतिवचनंस्यताद्रूप्यानुपपत्तेःकाव्यलिंगरूपतानुपपत्तेःकुतइत्याह॥नहीति॥नजनकःकिंतुज्ञापकइत्यर्थःराकधर्मीति॥प्रश्नोत्तरवाक्यद्वयीभिन्नवक्तृगतेतिभावः॥प्रश्नःसाध्यमुत्तरंसाधनं॥अनयोश्चेति॥प्रश्नप्रतिवचनयोःकाविरसेति॥काविषमादेवगतिःकिंलक्ष्यंयज्ञनोगुणग्राहीकिंसौरभ्यंसकलंचंकिंदुग्धाब्धेरुतोलोकः॥अत्रदेवगत्यादिरूढत्वादसंभाव्यरूपं॥प्रश्नपूर्विकापरिसंख्याप्रश्नपरिसंख्याअत्रप्रश्नादुत्तरमात्रेणान्यव्यपोहइत्यर्थःआकारादिति॥अनेनकुपिनोर्यातिव्याख्यानं॥भिन्नमितिव्याप्तं॥आकृतिमिति॥स्वेदकृतकुंकुमभेदरूपांइंगितंसाभिप्रायाचेष्टा॥संकेतेनेति॥संकेतकालेज्ञानव्यंमनोयस्यसनथा॥इंगितेनेति॥विदग्धतेनभ्रूक्षेपादिरूपेणगम्यइति॥व्याख्यगवार्थसारशब्दःक्रीवोन्यनुचित्यः॥क्रीवोन्यनुचित्यःअत्रान्यापोहकृतंचारुत्वमित्यर्थपरिसंख्यव्यंग्यंकृतंदसत्सारत्वंत्वत्रविश्रांतिनान्यव्यपोहअत्रचरोगनापर्यंतभागोवधिःधूमादीतिनद्विशेलग्निर्मद्वानसेधूमंजनयतीतिभावःहेतुफलेति॥हेतुःकारणं॥फलंकार्यं॥अतिशयेनेतिअतिशयःकारणस्यकारणांतराद्वैलक्षण्यंत

च्छेदयद्भिन्नदेशकार्यजननं॥युगपदिति॥यदिनं धूमखंडंभिन्नेकालेकिलकारणाद्भिन्नदेशतयाप्युपलभ्यते॥नद्युगपद्भक्षणान्निपिन्दनयोःकारणकार्ययोःस्वभावेति।अन्यथकार्यकारणभावेकदेशतयोत्पन्नायाःसंगतेस्त्यागःप्रसंगइति॥यस्यैवव्रणनस्यैववेदनाभणितननजनअस्त्रीकं दूनशतंकपोलेवध्वाचेदनासपत्नीनांअत्रदूतशतकारणंवेदनाकार्यंनचभिन्नदेशारुढत्वंसंगच्यति विरोधःसामान्योक्तत्वादुत्सर्गःभिन्नाश्रयत्वेनोक्तत्वादसंगतिविशेषःतथाचैवमिनिविरोधारुकारेयेकाधारत्वंविरोधस्योक्तमित्यर्थः साधनांतरेति।कारणांतरकलोपकारणसम्यगाधानंसमाधिःमानमिति।अत्रमानापनयनंकार्यपादपातोद्दनुःघनगर्जितंहेत्वंतरं॥यस्मादक्षणकार्यकारकरंस्यादित्यर्थः॥योग्यनयेति॥नरस्यवरंहीनस्यहीनंयोग्यमितियोग्यनाधानुरिति।अत्रवरंवरेणसंबद्धितं।चित्रमिति।अत्रहीनंहीनेननिंबकाकांतथारूपत्वात्कचिदिति।नयोरिति।कार्यकारणयोःकारणसक्तोक्रियागुणोकार्यसक्तक्रियागुणोचमिथोविरुध्येनेत्यर्थः॥शिरीषादिति अत्रहडगीस्मरानरूयोरननुरूपत्वाद्देपम्यंनमन्यइतिसिंहिकासुतोराहुसिंहौ॥अत्रशशस्यस्याधारबाधादाश्रयणक्रियाध्वंसःस्वस्यमहानर्थश्चनमालेति।अत्रकृष्णगुणानपीतगुणोत्पत्तिःकार्यगुणःकारणगुणनविरुद्धःआनंदमित्यत्रनेदकार्यनापक्रियेमिथोविरुद्धे।अत्रस्त्रीकारणंविरुद्धःकार्यःगतकृष्णानुसारेणान्यदप्याह॥गाढमिति॥अत्रहीनोगुरुकार्यकारीतिवैषम्यं॥असकलयेत्यपूर्णया॥मानेति॥अत्रमानुमशक्यत्वेनाधेयरूपोयशोगशिमहीनजगत्त्वयं

नुत्रिसंख्यत्वान्नुकंपरंगदनोपियशोगशेराधारतयामहीयस्त्वेनोक्तं॥अन्यथामानस्यासंभवःयुगपदिति॥अत्रविष्णुतनुराधारःसचमहान्स्वस्मान्मदस्त्राधेयाःपरंतनावमानेनमहत्तमवर्णानाःनदीयस्येति॥प्रतिपक्षसक्तस्यनरस्तुत्यैप्रतिपक्षस्तुत्यैरिपुबलित्वान्निरस्कर्तुमशक्योयदानदाश्रितकोपितिरस्करोति॥नदीयमस्कारइत्यर्थःत्वमिति॥अत्रतांतवरक्तोकामःशरैर्हंतीतिवास्तवोर्थःपश्चादुन्प्रेक्ष्यते॥निर्जितत्वोत्थादनुशयादिवेतिव्यंग्योन्प्रेक्षापि॥त्वंभवतीतिचप्रक्रमभंगःयथायेति॥अत्रविष्णुःशक्रःशत्रुस्तदीयंचक्रंतस्यसंबंधीसादृश्यादिंदुःतत्यराभवाद्विष्णोः॥प्रकर्षावगतिःईदोरिति संबंधिवक्त्रं॥नेनंदोःसंबंधःसाम्यात्॥तदीयनाविष्णुसक्तना॥समेनलक्ष्मणासाधारणेनेत्यर्थः॥निजेनस्वाभाविकेनेत्यर्थःवस्तुनावस्त्वंतरस्यतिरोधानेमीलितमितिसान्वयेनामचलीयस्तयेतिवचनान्नसामान्यालंकारतानत्रहिसाधारणगुणाश्रयेणभेदानुपलक्षणंनतूत्कृष्टगुणेननिकृष्टस्यतिरोधानं॥अपोगेति॥अत्रदृष्टिनरत्वादिकंसहजंमदोदयकृतस्यदृष्टिनरत्वादेस्तिरोधायकं॥नत्वापीति॥मदोदयेपिगतरयेतिदृष्टिनरत्वादेःबधोपीतिशत्रुसंबंधित्वेनभियोबधोपिकृतेनदक्षःसामर्थ्यंहिमाद्रिगुहानिवासरूपेनतत्प्रभवयोःशैत्यजड्ययोःनाद्रूप्यंआगंतुकरूपत्वंसमाननयासाधारण्येन॥नयोरिति॥कपपुलकयोरुपलक्षितथादृष्टत्वात्॥दृष्टइति॥उपलब्धिमात्रेत्रदृशिःनद्वयोरितिपूर्वितोभोभवेः॥कुहूरेतानिकुहूकुहूशब्दान्ननानाभिदेशोत्थाःस्मरितादितिस्मृत्वाप्राप्तिः सादृश्येविनास्मृतिर्नालंकारःयथास्त्रीवर्ण्यतद्

सौकुमार्यसङ्घटनावचःक्रमइत्यादि॥करयुगगृहीतयशोदास्तनमुखनिवेशिता
धरपल्लवस्यसंस्मृतपाञ्चजन्यस्यनमःतत्कृष्णस्यरोमाञ्चे॥अत्रपूर्वभावानुभूतस्यस्मरणं॥पूर्वत्र
त्विहभावानुभूतस्यप्रथमावेति॥निर्गीर्याध्यवसानरूपासंजायादिति॥भ्रांतिरत्तियत्रयुक्तेसत
येत्येवंरूपायाःतस्यभ्रमस्यभ्रांतिरत्रप्रतिभोत्थासादृश्यहेतुकाचस्मृत्यात्मकस्यज्ञानस्यसंस्थाऽर्कुक्कि
ज्ञानवन्नापिभ्रमादिहेतुकामूर्छायांवस्तुभ्रमणवत्तत्कर्मत्वेनेति॥कोधनेनेत्याक्षिप्यते
अलोच्यतेनेत्येवंस्तुपमानस्यउपमानांतरेतिमुखादेरतिचारुतयोपमानाकल्पनया॥लावण्यं
ति॥अत्रेंदादिकमुपमानंकेनार्थक्येनाक्षिप्तंयथासंख्यमप्यत्रास्ति॥रागाहीति॥अधिगद्विरूढरि
कर्यादत्वाश्रुणवचनीयंनवमुखेनकृशोदरेचंद्रउपमीयतेजनेन॥अत्रोहिअत्रोपमाननया
ख्यातस्येदोरपकर्षार्थमुपमेयत्वमुक्तं॥मुखस्यार्थादुपमानत्वंअत्रचंद्रस्यात्मगुणत्वान्नसाद
श्याभावादौपम्यस्यानिष्पत्तिःगर्भमिति॥भग्नावराकाअत्रोत्कृष्टानामुत्कृष्टानामुपमेयत्वकल्प
नेवानादरःपूर्वत्रतूपमित्यनिष्पत्तिरेवानादरःतत्कल्पनायामितिउपमानत्वकल्पनायांअह
मिति॥गुरुरुत्कृष्टःअत्रयथाविषंगारकेनतथारक्तवाक्यमितिविषस्योपमानत्वमसंभाव्य
मनःप्रतीपता॥मलयजेति॥अत्रासतीचंद्रकुन्दयोरेकसाप्रस्तुतातथात्रश्यामरक्तेदोगरागादश्वे
द्रोश्रुभिःसहाविभाव्यतांगनाइत्यभेदेनोक्तिः॥अष्टाविंशतिमात्रेदीपदीप्तेदः॥तथात्रस्वगुण
स्यागाभावान्नतद्गुणालंकारता॥एकात्मनेति॥एकरूपत्वंएकस्यनिन्द्यान्यस्यस्तुत्यनमितिरू



क्षणाभावान्नापन्हुतिः॥निमित्तांतरेतिहंगपातोनिमित्तांतरंनानात्वंभेदःनव्यदसितुमितिअत्र
पूर्वंगर्भेदोषात्पश्चाद्भेदःनद्विज्ञानमभ्रांतेरयादित्यर्थःतस्येत्यभेदस्यएकात्मेतिएकस्वभावा
दिवमितिअनन्यप्रभावोविषयार्थइत्यत्रैकत्वयोविषयत्वेनाधारःतद्भावेनवाचामाधयानां
स्थितिरुक्तासावसइति॥सावसंतितवहृदयेसैवाज्ञाःसाचश्रवणयोःअस्मादृशांकंदरशयका
शःकुत्रयापयानां॥अत्रैकैवस्त्र्यागकेनैववसनरूपेणयुगपच्चित्तादौवर्त्तते॥विधिनेति॥अत्रयं
नैवयत्नेनस्फुरद्भुतरूपेत्यादिविशेषणवास्त्रसूत्रेनैवाशक्यकामार्कगुरुरूपेकार्यांतरम
पिकर्तुंप्रस्तुतंचित्रयोगच्छन्नित्यादेनायमलंकारोशक्यत्वाभावात्॥गर्हणेति॥इदंनिरलंकारं
तरत्वेनोदाहृतं॥पूर्वेनुसालंकारांतरत्वेनतत्रयथासंख्यस्यापिभावान्नसंकरेति॥सावक्तिरेवं
वातिशयोक्तिरितियोगोविभाव्यतेविशिष्टतयाभाव्यतइत्यर्थःविनेत्येतेनसर्वालंकारबीजमेवं
तिभामहाद्याःविभिन्नेति॥करीरमंकुरःप्रगुणवर्णानाप्रकृष्टगुणवर्णानामीलितवस्तुवस्त्वंतरेणा
च्छादितंप्रतीयते॥इहत्वनुपन्हुतस्वरूपमेवचस्तुवस्त्वंतरगुणैरपरक्तंलक्ष्यतइतिविवक्षःस्वगु
णत्यागान्नापादेसामान्यालंकारःअनन्हुणइतितस्याधिकगुणस्यास्मिन्गुणानसंक्रीत्यतन्हु
णःधवलोसीति॥धवलोसियद्यपिसुंदरंतथापिममत्वयारंजितंहृदयंरागेणहृतेपिहृदयंरागा
निर्हेतोर्नरक्तोसि॥धवलोयंपश्यतांगोरागोरंगानुरागोअत्रपूर्वार्द्धविरोधोनोत्तरार्द्धे॥शिला
धारत्वेनरक्तारक्तयोःप्रतीतेःपूर्वार्द्धेधवलस्यविरुद्धरागजनकत्वनविषमालंकारोपि॥गोग

मिति॥ अत्रप्रकृतद्वेस्याप्रकृतजरूयोगेपिननद्वयंतत्यतद्गुणःदृश्येति॥ अत्रदृग्रूपोपायेन येनहरःस्मरमधार्क्षीन्नेवकांतास्तमजीजिवन्दाहस्यचजीवनीयत्वंविपक्षेसेननिष्पादितवस्तु व्याहतिहेतुत्वाद्धाघातना॥ विरूपाक्षस्यतिवामलोचनाइतिचव्यतिरेकगर्भोशब्दो॥ जयनीशिति व्यतिरेकोक्तिरित्यत्रव्यतिरेकनिमित्तताहृग्रूपोपाययोर्भेदेपिअभेदादतिशयोक्तिरपि॥ रसव दाद्यलंकाराःप्रागुक्ताः आशीस्मृतालंकारःप्रियोक्तिमात्रत्वात्तस्तद्वास्मरत्याख्यभावत्वेभावध्वनित्वाद्वा॥ यथासंभवमिति नसर्वेषामेवालंकाराणांकिंतुकेषांचित्तत्रापिक्वचिद्वयोःक्वचित्त्रयाणामित्यादिशब्दार्थोभयालंकारविषयत्वेनत्रिरूपत्वेपिसंसृष्टेरेकरूपत्वमेव॥ मिथोनिरपेक्ष्य रूपस्यरूपस्यैकत्वानिरपेक्षतयैकत्थानिलतंदुलन्यायेनालंकाराणांयोगेसंसृष्टिःसंकर स्तुस्वरूपेणैवनानात्वेनोक्तत्वान्निरपेक्षयाभावात्क्षीरनीरन्यायेनालंकाराणां योगःकुरुमेति॥ अत्रयमकानुप्रासाविति विजानीयालंकारसंसृष्टिर्यथातथाकरुकरोल्क करोलइतिचसजातीययमकालंकारसंसृष्टिरपित्थाविधेइति॥ मिथोनिरपेक्षेरुपमोत्प्रेक्षइ त्युक्तपूर्वार्द्धेगोविजानीयेलिंपतीवेतिवर्षतीवेत्युत्प्रेक्षेसजातीयेनयोरत्रसंसृष्टिः॥ मनास्य वमामेयगात्तत्सर्वतःप्रसरद्भावण्यतारुणानांहृदयलुठिंविलसतीनिवारयति॥ महमदेनेति रूपसद्भावण्यपरिसक्तेतिपरिघक्तमाणांक्रिडतीमित्यर्थःरूपकंचेति॥ हृदयलुठिंवद्धृदयलु ठितिरूपकं॥ एकत्रवाक्यइतिशब्दालंकारव्यक्तेः छंदसीत्यर्थालंकारोनेष्टः॥ अत्रतद्गुणमिति



शोणंबिंबोष्ठेतिवाक्यगंभीतिमतेति॥ गुंजाफलानांस्तनइतिप्रोक्तेननदाश्रयेणेतिभ्रांतिमदाश्रयेणे ति॥ जटेति॥ करोरश्मिहस्तो॥ वैराग्यंस्रोहित्याभावोपि॥ अत्रजटाभाभिरित्युपमावल्लयइतिरूपकंव्या पत्तेरिवेत्यत्रेक्षावैराग्यतिस्रोषःकपालेतिरूपकं॥ नडेतुरेकिननस्रडितिसमानोधर्मःपित्तवन डवेत्यत्रेक्षावैराग्यतिस्रोषःकपालेतिरूपकं॥ नडेतुरेकिननस्रडितिसमानोधर्मःपित्तवनडवेत्य पमायाश्चमत्कृतिहेतुर्भस्मनेवापांडुरित्यत्रेक्षा॥ अत्रस्रोषस्योपकारिण्युपमासमुत्थापकत्वान स्रोषोपिरूपकोत्प्रेक्षयोरुपकारीगतैःसर्वैरुपकृतारत्यपमाचमत्करोतीति। करंकाक्षेत्यत्रकिमु पमायारूपकेणवासमासःस्यादित्याह॥ करंकगतेति॥ स्रोषछायाश्रयेणचंद्रोपिकरैःकरंकधा येवं॥ परनमुख्ययावृत्त्येत्याह॥ स्रोषेति॥ चंद्रबिंबकराःकरंकश्चेतिप्रत्यासत्तिः॥ नचार्यंति॥ क रंकस्यमुख्येपीत्यपमापक्षेकरंकं॥ उपचारस्यागतिकगतित्वान्नांगीकारःराजतीति॥ अभि हतोद्यानवानांरावःसिंहनादोयेनेतिशोभोरामेत्रणेअतिपातिनोवेगगामिनःसारवानदायस्यानद्यो स्यानथा॥ साचगजतानिपातिरक्षेति॥ विशेषणपरित्रायतेथूथंअविरतंदानेनचरासारास्त्रिग्धा वनंदयतेवनदा॥ अचलंवात्राणंददात्यवदा॥ शब्दवच्छब्दालंकारयोरत्रांगांगिभावान्नैरपेक्ष्येण संसृष्टिरवेत्याह॥ परस्परेति॥ मिथोविवेकेनहयोरिहयत्तरभावात्उपेक्षेवचपरस्परमनुग्रा ह्यानुग्राहकभावःअथवाअसावनुग्राह्यःसाधनुग्राहकइतिनिर्णेतुमशक्यत्वेमिथःकांक्षा शब्दालंकारयोरितिसंसृष्टिरेवात्रयुक्तायदाशब्दालंकारद्वयस्यैकवाचकगतत्वेतृतीयःसंक

र: समुच्चयेनेति गकस्यचेत्यत्र चकारेण समुच्चयद्योतकेन॥ यथा गौरीयथा गवयो निर्मरुच्छाय: तथा किंविधानां सरसां पानीयाजरूनिधिनकुल: सरसेति॥ सरसपानीय: सरस्व वाणीक:श्व॥ नयनेति आशा आस्थाऽपि॥ न मोहोऽपि॥ गतयोगितिवक्रविवया: समुच्चयेतिबिंब मुखंचेतन प्रसीदतीति भेद्यागकस्य प्रकृतत्वेन्यस्याप्रकृतत्वेदीपक॥ द्वयोरप्यप्रकृतत्वप्रकृ तत्वेवानुन्मयोगिना॥ अयमेवेति॥ अनिश्चयात्मा॥ वक्रेति॥ अत्रवक्रंशशीवित्यपमानत्ववक्रमेव शशीतिरूपकमित्याह॥ मुख्यनयेतिहासयुक्ति: प्रकृतत्वान्मुख्यासाचकक्रानुगुणत्वेपमासाधि का तस्याइतिहासयुक्ते: गतस्याश्वशकुनयाचेदपिकिंचिदनुकूल्यमनर्मोन्यतानबाधकत्वं वक्रेदापिति॥ अत्रापरत्वंरूपकस्यसाधकतांप्रतिपद्यतइतियोग:॥ अपरत्वमिति॥ वक्रस्यव हुत्वादपरत्वमधिरूढयावरूढमितिनानुकूलं॥ चंद्रत्वैकत्वादिसमयावरूढत्वेनुकूलमेव साधकत्वेन कावाधकत्वेनाह॥ राजेति॥ राजेवनारायणइतिरूपकसमास: उपमानप्राधान्येरूपकमुपमे यप्राधान्येउपमेतिसर्वत्रज्ञेयं॥ सदृशमितिराजानंप्रेयसीलक्ष्मी: निजपतिनुल्यमन्यंकोताना लिंगतीत्यर्थ:॥ पादावुज्जमिति॥ अत्रोपमायांपादप्राधान्येनूपुरध्वनियोगोघटते रूपकत्वं वुज्जस्यप्राधान्येनघटते॥ विध्युपमर्दिनइतियद्यपिमंजीरसिंजितंरूपकविधिछेदेनबाध कंपादानुकूल्यादुपमीप्रतिसाधकंचरयात्तथापिबाधकत्वेनैवव्यपदेश: प्रधानेनव्यपदेशा भवंतीतिन्यायात्साधकत्वापेक्षयाबलिष्ठत्वेनोत्कटनयाप्रतीतेर्बाधकत्वंप्रधानं॥ तदपेक्षयेति

साधकत्वापेक्षयाबलिष्ठत्वेनोत्कटनयाप्रतीतेर्बाधकत्वंप्रधानं॥ तदपेक्षयेतिसाधकत्वा पेक्षयाभत्रेकपदेति॥ यद्वयंनदरिवलवाक्यार्थसावयवंरूपकं॥ तथापिप्रतिपदंरूपकाभा वान्तथाव्यपदेशइत्येकपदानुप्रवेश: शब्दार्थवर्त्यलंकारसंकरस्तूद्भटोक्त: संसृष्टिरेवेतित्रिधे व॥ प्रकारांतरेणेति॥ प्रकारत्रयादन्यप्रकारेण॥ सर्वेलंकारा: संकरेउदाहर्तुमशक्याइत्यर्थ: तत्प्रभेदेति॥ तस्यप्रभेदास्त्रय: प्रकारास्तेषामपिभेदास्तदलंकारांतरयोगा:॥ भावाभावा वितिं॥ भावान्वय: अभावोव्यतिरेक: प्रभृतयोपीति॥ प्रभृतिभणनादपह्नुतिसंदेहोक्तिश्लेषसं करसंसृष्टिदीपकाद्याज्ञेया:॥ अर्थस्यत्विति॥ वस्तुनटापरंपरितरूपकादेरुभयालंकारतया भिन्नत्वेनवक्तुयुक्तावर्थालंकारेषुतत्पाठोर्थस्योत्कटतयावैचित्र्यात्॥ एवंपुनरुक्ताभासोपिशब्दस्य उत्कटवैचित्र्याच्छब्दालंकारत्वेनोक्त:॥ नन्वाश्रयाश्रयिभाव: शब्दार्थालंकारत्वहेतुनान्वयव्यतिरे काविद्याह॥ योलंकारइतिविशिष्टस्येतियत्राश्रयस्यनित्यतानास्तिनित्यस्यहिनान्वयव्यतिरेका निबंधनं॥ नित्यस्यव्यतिरेकाभावात्व्यतिरेकाभेद: सर्वेषामित्यलंकाराणां॥ उक्तेघिति॥ दोषेषुअन र्थाइतिदोषा: प्रसिद्धीति॥ कदाचित्चकारप्रियोपिस्यादन्यानिनुनघटतएव॥ रमणेतिरमणंक्रीडा नाप्रियोकारणमित्यस्याघटनात्॥ शकुंतेति॥ शृंगारेद्युपनागरिकावृत्तिर्योग्या॥ भुजंगमस्येति॥ सद् शब्दोनिपातश्छांदस: सद्वार्थ: सदोभासंतेसदोभा: सज्जला: सदोभा: सबला: नाहशीतिजातिप्र माणगतावेडालेगिति॥ अत्रजातिन्यूनावन्हीत्यत्रप्रमाणंपातालमितिपात्र: प्रवाह: अत्रप्रमाण

स्याधिक्यं अयंपदेत्यत्रतु जानेः अन्यरूपमिति॥उपमेयरूपमुपमानरूपंवानस्येतिधर्मिणः प्रतीयमानेनशब्दानुक्तेनोभयानुगमक्षमेणशब्दोक्तसमानधर्मव्यतिरिक्तेनकेनार्थान्तर्थः॥भग्नेति उपमेयस्यविशेषणादिकमुपमानेचेन्ननिर्व्यूढं॥तदाप्रक्रमभंगः॥ चिंतेति॥अत्रच्युतत्वादिकोधर्मउपमानोपमेययोःप्रत्येकमन्यलिंगवचनइतिप्रक्रमभंगःलिंगवचनविपरिणामेनयद्यप्यपरस्यापिसंबंधस्तदाभासरूपवाक्यभेदवाक्यदुष्टौ॥तथासतिप्रकृतार्थप्रतीतिर्व्यवधीयते॥विपरिणामश्चसाहित्येनस्यात्॥अनर्घ्येरिति॥गुणरत्नानांपंक्तीनांविशेषणत्वेपिनरूपभेदः असदृशइतिदक्षिवंतत्वस्येनजसेनच॥मधुरतयाहेतोमधुरतांवाबिभर्तीति॥नतरत्वेति॥कोविदप्रसिद्धप्रकारेणप्रत्यर्पणेतिमज्जनेस्नानमुडुनेनाभ्योविशेषणविविक्तामूर्तिर्यस्याःसातथा॥अंतःशब्दःस्वरूपे॥संबंधेवाल्कनात्वंशब्दैः कांताअर्चयंतीपूजयंतीशोभयंतीच॥अत्रराज्ञीसंबोध्यानस्तापरभागोयुक्तदर्थःविधेरिति॥अप्रकृतप्रवृत्तिरूपस्यगंगायामसेभवादितियोगः॥गवंजातीयकस्येतिनिमंत्रणादेःगम्याम्युपहास्यतांवामनइवेत्यादाविवकचित्कालपुरुषविध्यादियोगेनापिदोषःस्यात्॥उच्चरितमितिशब्दोक्तंप्रतीयमानमितिअनुक्तमपिगम्यमित्यर्थः॥यथापद्ममिवमुखमित्यादौभातीत्यादिगम्यधर्मांतरेणोपमा॥कालादिभेदवाचकान्तकाव्यसाक्षादुक्ताद्भवादित्यादौधर्मोधर्मांतरंप्रकृतेति॥कालादिभेदवाचीप्रकृतोधर्मआपेत्यादिःसामान्यधर्मेणेति॥कालादिभेदवा ९३

चिनायुधश्चिरोत्थवदनश्चयंतुवदतीतिकालभेदोव्यक्तःसत्यवाद्यमिति॥युधिष्ठिरइवसत्यवादीसन्नसौसत्यंवदतितिनोकालनिर्देशान्नकालभेदःसत्यवादित्वधर्मगम्यमादायात्रोपनिबंधेनकालभेदइत्यर्थः॥नसंभवतीति॥कथंतदुपमानीभविष्यतीतिभावःकेवलस्येतिअसमासस्यच॥समासस्तुयोग्यताद्यर्थवादीरयात्॥नस्यचेतिसाधर्म्यस्यव्यस्यामित्यत्रशंकायां॥तत्रेति॥संभावनाभिधानेचकोन्यत्रनोन्यत्रप्रख्यमितिनिर्णयाभिधानप्रत्ययप्रतिभासमानस्यास्येत्यत्रेक्षणरूपस्याव्यर्थएवेतिउत्प्रेक्षामात्रमेवायुक्तं॥नतत्समर्थकोर्थारन्यासःदिवाभीरुशब्दस्यात्रकार्थत्वेनसमुचितोपमाव्याख्यायां॥नेतदोषावतारःतस्येत्यपमाविशेषस्यस्मृशतीति॥नापःखेदापि॥मानशब्दःपरिमाणाभिनानयोःचिरयायिदिनादीर्घाहानिदाघःसदृशेति॥रवेःकरेरितिसदृशमनुक्तंविशेषणादिनाश्रयास्तुनायकेतिविशेषणंव्यक्तिर्लिंगंतद्विशेषःपुंस्त्वस्त्रीत्वंच॥नायकनयेति॥नायकश्चनायिकाचेत्येकशेषःननुयथाप्रियास्पृशंतंप्रियंदृष्ट्वान्यस्यनापःस्यात्तथाकेदिशःस्पृशतिसत्तिर्गीर्भाश्रियोपितायइतिस्त्रियोपमेयमितिदयितनयेतियुक्तमित्याह॥स्त्रीपतिः ननथेति समासोक्तिप्रतीतिःस्वयंचेतिःस्वयंचेतिनरूपबनाप्येनइत्यस्यापंदुर्दैवंयत्फलंतत्तुध्यानमीहितप्रदास्यापस्यशयनफलेविश्रांतोयोनरूढस्तत्रहितप्रदाअत्रश्लेषोपमेवसंध्योपमानोपादानंविनासमासोक्तिप्रतीतेरभावात्नीत्येतिसाधारणविशेषणरूपया॥मय्यवेति॥तृणप्रायोमणिरप्रधानःकाचादिःनकेपनेनविशेति॥

अप्रस्तुतेति। अप्रस्तुतमचेतनत्वेनाविशेषितं चन्द्रस्यसामान्यंगशाकादितद्वारेण॥ अन्येपीति॥ यथाक्वचित्कालेप्रसरतांक्वचिदापत्यनिष्ठता॥ शनैश्चरारेर्गकुलेत्वयाग्निर्हृदयंवरः॥ अत्रोपमायांशनैश्चरोपमानेनप्रकृतार्थकदर्थनेनुचितार्थता॥ क्वचिदितिसामान्येननिष्पाद्यपश्चात्कालेनयोगः अन्यथातुनिंदानिष्ठश्चेत्यः प्रान्साहनिंदादानुचितार्थतापिनदोषः यथाद्रुमाणिवप्रेषणेप्रेष्यराजः वियोगभारक्लांतस्त्रीणांचंद्रालुडइवचंद्रनाइत्यादौ॥ यस्यार्करूपंगामूर्त्तिःसच्चक्रानंददायिनी॥ अत्रार्केणमद्भूर्तेःसाम्यंवाच्यंनरूपगत्वमात्रंसच्चक्रेतिविशेषणंवैयर्थ्यप्रसंगान्नचनस्साम्यंतुल्यादिशब्दवतरूपगशब्दोवर्त्तोत्कृष्टगोप्रत्यवाचकत्वं॥ राजाकुवलयानंदासीत्पयोंशुरिवरुचत इत्यादौराजशब्दस्योपमायथत्वेनश्लेषनिष्पन्नस्यार्थस्यहीयदोपम्यकस्मननतदधिकौपम्यद्योतकमेवदद्यंग्यत्वान्नशब्दः॥ गर्वदिलीपइतिराजेंदुरिंदुःक्षीरनिधाविवेत्यत्रराजेतिश्लेषेहित्वाइंदुःक्षीरनिधावित्युपमारागिणीराजेंदुरितिरूपकमुक्तं॥ नचोपमाव्यंग्यार्थाधिक्यवतोःश्लेषरूपकयोःसंसृष्टेव्यार्थस्यशोभावात्॥ तस्मादत्रोपमाधिकानिर्मोकमुक्तिमिवरागनीरागस्येत्यादौरूपकेणसाम्यस्योक्तत्वादिवयोगेधिकपदत्वंदोषः॥ तथालक्ष्मीरप्यरविंदसोदधवलश्रीर्निर्व्यूढपर्यंकिकत्यत्रारविंदस्यकेनापिसाम्येसोदत्वेनरूपमस्तुचलक्ष्यादीनांतुनकिंचिद्रूपमस्तीतिअधिकपदत्वं॥ तथा॥ याद्यर्गभारास्तनयापिशीतलैः स्वस्यायमस्यापिजनस्यजीवनैः कृष्णोपिशुद्धेरधिकंविधात्तांविदंतुमर्हांसि



ग्नकैःपठीयसी॥ अत्रनघाःपयोभिःपरमार्थदृक्येपिशब्दाप्यितनानात्वानुभवाद्विरोधस्यशिन्नाधारत्वंतच्चासंभवविरोधस्यैकाधारत्वेनोक्तत्वादित्यसंभवोदोषः॥ नरंगयदृशांगणेपतत्तुचित्रमिंदीवरमित्यत्रोपमानभूतेंदीवरादेरयकर्षहारेणनेत्रादीनाव्यतिरेकोवक्तुंशक्तोनःसचासवतुचंद्रिचंद्रेनभस्कत्वासाम्यमात्रप्रतीतौनानिर्व्यूढइतिव्यतिरेकेभग्नप्रक्रमत्वंभवत्तुतद्विचंद्रेनाइतित्युक्तं॥ गर्वमर्पिनशोमुरवयोर्नव्रियसंगतिः॥ अंगणेउदंचयमनाग्मुखमित्यक्त्वामुखेचिन्मेगणंचंद्रांचिनात्व्योन्नोधिकंतद्वारेणचचंद्रान्मुखंनाधिकमितिनयुक्तं॥ इत्येषइति॥ रूपोद्भूनोल्लेखाख्यविभिन्नोपीति॥ नानाग्रंथगतत्वेनपार्थक्येनस्थितोपि यदेकरूपोभातिनत्रसंघटनाविसंस्थुलस्यमुखबोधायैकत्रसंगतइतुःसंधाःसर्वेप्यंतर्भ्रमाइत्यर्थः॥ अथचायंग्रंथोन्येनारब्धःपरेणचसंधितइतिह्येषोपिग्रंथघटनावशादखंडायतोसंघटत्वलक्ष्यसंधिस्यादित्यर्थः॥ श्रीभोजेनसोमिन्यक्तयदुप्रमाणानिसंभवश्चालंकारसर्वस्वानि॥ केषांचिदुक्तंघतमौवानुकेषांचिदचमत्कारित्वानुकेषांचित्काव्यशरीरत्वाच्चतानिनानाचकाव्यालंकारतयाप्रतिपादितानीति॥ ७१॥ इत्याचार्यश्रीमाणिक्यचंद्रविरचितेकाव्यप्रकाशसंकेतेदशमोल्लासस्संकेतःसमाप्तः॥ ७१॥ ७१॥ ७१॥ शुभंभवतु॥ ७१॥ अदृष्टदोषस्मृतिविभ्रमाच्चयदर्थहीनंलिखितंमयात्र॥ तत्सर्वमार्यैःपरिशोधनीयंप्रायेणमुह्यंतिहिलेखकेति॥१॥ यादृशंपुस्तकेदृष्टंतादृशंलिखितंमया॥ यदिशुद्धमशुद्धंवामममदोषोनदी

म

यतो ॥२॥ नेत्राद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबंधनात् परहस्तगतांरक्षेद्देवंवदतिपुत्तिका
॥३॥ ७॥ ॥ शुभमस्तुसर्वजगतःपरहितनिरताभवंतुभूतगणाः॥ दोषाःप्रयांतुनाशं
सर्वत्रसुखीभवतुलोकः॥ ७॥छ॥छ॥ श्रीशके १७८४ दुंदुभिनामसंवत्सरेकार्तिकमासे
कृष्णपक्षे १ तिथौ इदंपुस्तकंसमाप्तिमागत् ॥ ७॥ ॥श्रीराम॥ ॥ ७॥ ॥

प्रो. आ. वि. काथवटे.

MEMORIAL